॥ चतुस्त्रिंशोऽध्यायः ॥ Chapter-34

वसिष्ठ उवाच :-

ततो गच्छेन्नृप श्रेष्ठ देवं सिद्धिविनायकम् ।
यत्र सिध्यन्ति राजेन्द्र वर्णाश्चत्वार एव हि ॥ १

धर्ममूर्तिरभून्नृप धार्मिको भूपतिः पुरा ॥
यथा तेन तपस्तप्तमखिलं तन्निशामय ॥ २

चतुर्थीवासरं प्राप्य स्नानं कुर्वन् समाहितः ॥
अभिवाञ्छितलाभाय पूजयत्यम्बिकासुतं ॥ ३

स कदाचिन् महीपाल श्रुत्वा श्रीमालमेष्टितम् ।
ययौ तीर्थावगाहाय सभृत्यबलवाहनः ॥ ४

गच्छतस्तस्य मार्गेथ ह्यपादोद्धतं रजः ॥
सम्मुखोभूत्सुदुर्वासाः पुरस्तात् क्रोधनो मुनिः ॥ ५

उत्तीर्य स रथात्तूर्णं विलुठन् जगतीतले ।
पपात पादयोस्तस्य सोऽब्रवीत् न किञ्चन ॥ ६

येनाथ महीपाल धर्ममूर्तिर्महीभुजा ॥
जगाम रथमारुह्य शङ्कितः क्रोधनात्ततः ॥ ७

---

१ बी ह्यपादोत्थितं

२ ई - क्रोधनान्नृप

ततः सैन्यै व्यपक्रान्तै दुर्वासाः क्रोधमूर्च्छितः ।।
कृतागः सैनिकैर्नास्य नतिरित्थमचिन्तयत् ।। ८

तेन दास्याम्यहं शापं सैनिकानाममुष्य वै ।।
इति कृत्वा गतिं राजन् क्रोधक्रीडागृहं पुनः ।। ९

धर्ममूर्तिमुवाचेदं निवर्त्यार्द्धपथात् पुनः ।। १०

दुर्वासा उवाच :- मा भो राजन्निमैर्दुष्टैः सैनिकैस्तव पाप्मभिः ।।
न नमस्या कृता तेन शापं दास्यामि दुःसहम् ।। ११

वसिष्ठ उवाच :- इत्युक्तः स तदा राजा धर्ममूर्तिः प्रतापवान् ।
सस्मार विघ्ननेतारं गौरीपुत्रं विनायकम् ।। १२

अथागमत्तत्र वेगेन भगवान् मूषकासनः ।।
तमादाय मुनिं हस्ते प्रोवाचेदं कृतस्मितः ।। १३

विघ्नराज उवाच :- विरम्यतामिह क्रोधान्मिथ्यासंकल्पजान् मुने ।।
एष ब्राह्मणशुश्रूषुर्मुख्यश्चैक्ष्वाकवो नृपः ।। १४

----

१बी निवर्त्यार्ध ई निवर्त्यार्धपथात्पुनः

कृते पयपराधे पि तच्छांति: क्रियते त्वया ।।
मामून्निरागसि क्रोधः लामेणाब्राह्मणायत: ।। १५

दुर्वासा उवाच :- लवणं नास्ति मिष्टत्वं नास्ति तोयं हुताशने ।।
नास्त्यूष्णरे बीजरोहो नास्ति दुर्वासासि क्षमा ।। १६

परस्विष्टस्य विघ्नेश भोक्ता भवसि किञ्च यत् ।।
याहि स्वमात्मभार्गेण शप्स्याम्येनं महीभुजं ।। १७

विघ्नराज उवाच :- अहं पुत्रास्त्रि-नेत्रस्य तदंश-प्रभवो भवान् ।।
तेन तेहं सुतो मान्यः सम्बंधेनामुनामुने ।। १८

वसिष्ठ उवाच :- इत्युक्तस्तेन दुर्वासा जहासोच्चैर्महीपते ।।
पश्यत: सर्वसैन्यस्य गणेशं चेदमब्रवीत् ।। १९

दुर्वासा उवाच :- नैष्ठिकस्थानपत्यस्य नरेन्द्रप्राणशंकया ।।
पुत्रीभूतोऽसि विघ्नेश तस्मात्ते प्रवदे नृपं ।। २०

वसिष्ठ उवाच :- इत्थं प्रसाद दुर्वासा ययौ शीघ्रं विहायसा ।।
गणेशेऽपि तिरोभूते श्रीमालमागमन्नृप ।। २१

-----

२ क- सी ई डी परिस्पृष्टस्य (ए ४) च्चै
ख- डी- परिमृष्टस्य (ए ५) ष
१ ए ब्राह्मणायत:
३ ए अहंपुत्र

प्रसादेन गणेशस्य सभृत्यबलवाहन: ।।
दुर्वाससा विनिर्मुक्त: पतगं इव बन्हिना ।। २२

तत: कृत्वा तीर्थयात्रां दत्वा दानानि भूरिश: ।।
प्रणिधाय पुरं सैन्यं तपस्कर्तुं स्वयं स्थित: ।। २३

परिव्राजकरूपेण कस्मिंश्चन जलाशये ।।
आराधयन्नसुरधं विश्वरूपिणमव्ययं ।। २४

वल्मीकासने तस्थौ ध्यानमीलितलोचन: ।।
परित्यक्तसुखंभोगो निर्ममो निरहंकृति: ।। २५

हृत्कोडकुहरस्थस्य गणेशस्य वशंवद: ।।
अथ प्रत्यक्षतांप्राप्तस्तस्य देवो विनायक: ।। २६

महाविलकपोल: सन् दधान: परशुं करे ।।
सूर्यकोटि प्रतीकाशो भिन्नाज्जनचयोपम: ।। २७

तं दृष्ट्वाथ महाराज प्रत्यक्षं पार्वतीसुत: ।।
तुष्टाव परयाभक्तया सोमधूर्तिर्महीपति: ।। २८

----

१ सी डी ई (क ख) कस्मिंश्चित्
२ क सी ई जलाशये ३ ४ सी, ई आराधनाय, ५ बी ई मदायम्
१ ए भूरिश: ८ ए सोमधूर्ति (ए ६) प्रतिकाश ६ ए सुख

दंभधूर्तिरुवाच :- नमो ऽस्तु गणनाथाय[1] गणानां पतये नमः ।।
ब्रह्मरूपाय देवाय विष्णुरूपाय[2] ते नमः ।। २६

मेरुमन्दररूपाय नमः कैलासवासिने ।।
भक्तस्तुताय देवाय नमस्तुभ्यं विनायक ।। ३०

दन्तोन्मूलित-दैत्य[3]चमूभ्द्रववनाय च ।।
त्वया स्मृतेन हि पुरा देवैः समरमूर्धनि ।।
गजरूपमिदं कृत्वा निहताः सुरविद्विषः ।। ३१

त्वमग्रणीः सुरेन्द्राणां नराणां फणिनां तथा ।।
त्वया व्याप्तमिदं सर्वं गणेश्वर जगत्प्रभो ।। ३२

शास्ता वै सर्वलोकानां कस्त्वन्यस्त्वामृते भुवि ।।
सिद्धिदोऽसि प्रपन्नानामभक्तानामसिद्धिदः ।। ३३

त्वं देव शंकराज्जातः पार्वत्यास्त्वं गणेश्वर ।।
तेजोभिस्तनुसम्भूतैर्जगन्मात्रा विनिर्मितः ।। ३४

----

३ बी ई- दन्तोन्मूलित दैत्य भुवनोद्भवनाय च

१ ए गणनाय ( ए २) विश्नुरूपाय

३ ए दैत्यै

प्रसीद देवदेवेशप्रसीदासुरमर्दन ।।
त्वं हि मे शरणं श्रेय: परमा त्वं हि मे गति ।। ३५

गणनाथ उवाच :- वरं वृणीष्व[१] भूपाल तुभ्यं दास्यामि वाञ्छितं ।।
अनया ऽनन्यया[२] मत्क्या नादेयं मेऽस्ति किंचन ।।

राजोवाच :- यदि तुष्टो गजेन्द्रास्य मम त्वं भक्तवत्सल: ।।
श्रीमाले तदिह क्षेत्रे स्थिति देव सदा कुरु ।। ३७

न श्रीमालं त्वया त्याज्यमेष मेऽस्तु वर: पर: ।। ३८

तीर्थयात्राचिकीर्षूणां[३] श्रीमालमनु मानद ।।
सिद्धिदो भव भूतेश यदि मे ऽस्ति तपो महत् ।। ३९

विघ्नराज उवाच :- वरदोऽस्मि महीपाल तवभक्त्या[४] ह्यनन्यया ।।
तद्ब्रूहि वाञ्छितं सर्वं यत्ते मनसि वर्त्तते ।। ४०

राजोवाच :- श्रीमालं क्षेत्रमासाद्य स्थिति: कार्या सदा त्वया ।।
एतन्मे वाञ्छितं सर्वं भूयान्मूषकवाहन ।। ४१

----

२ ए गन्यया ( ए १) वृणिष्व
३ ए चिकीर्षू
४ ए भक्त्या

विघ्नराज उवाच :- श्रीमालेहं नवत्स्यामि प्रीत्या तव नरेश्वर ।।
सिद्धिं दास्यामि भक्तेभ्य: पूजित: कुसुमोत्करै: ।। ४२

राजन्निह स्थितं ये मामर्चयिष्यन्ति मानवा: ।।
तेषां कार्याणि निर्विघ्न[१] सिद्धिं यास्यन्ति तत्क्षणात् ।। ४३

न रोगा: प्रभविष्यन्ति न यास्यन्ति पराजयं[२] ।
न व्याधिभ्यो भयं तेषां भविष्यति कदाचन ।। ४४

येऽत्र स्नानं करिष्यन्ति कुण्डे मम बहूदके ।।
सम्पत्स्यन्ते महारोगा: कुले तेषां नकर्हिचित् ।। ४५

त्वया कृतमिदं स्तोत्रं ममाग्रे य: पठिष्यति ।।
प्रीति[३] स्तस्य प्रदास्यामि सद्य: सिद्धिं समीहितां[४] । ४६

वसिष्ठ उवाच :- इत्युक्त्वान्तर्दधे देव: पश्यत: प्रथ्वीपते: ।।
सोमधूतिरथ श्रीमान् हृष्ट: स्वपुरमीयिवान् ।। ४७

तत: प्रभृति[५]भूपाल ख्यात: सिद्धिविनायक: ।।
श्रीमालेऽद्यापि लोकानां भक्त्या यच्छति वाञ्छितान्[६] ।। ४८

----

२ बी पराभवन्

३ ई नरोगा: प्रभविष्यंतिप्राप्स्यंति न राजन:

६ बी वाञ्छितम्

१ ए निर्विघ्नं ३ ए प्रति ५ ए प्रभृतिपाल

तत्र दानं प्रशंसन्ति ब्राह्मणाय विपश्चिते ।।
सूक्ष्माणां रक्तवस्त्राणां[1] द्विजा दृष्टपरावराः ।। ४६

एतत्सिद्धिगणेशस्य महात्म्यं कथितं तव ।।
श्रुत्वा यन्मानवो भक्त्या नविघ्नैर्बाध्यते क्वचित् ।। ५०

---

इति श्री स्कंदपुराणे एकाशीतिसाहस्त्र्यां संहितायांब्राह्म विभागे तृतीयः परिच्छेदे श्रीमालमहात्म्ये सिद्धिविनायक माहात्म्यं नामचतुस्त्रिंशोऽध्यायः ।। ३४ ।।

-ॐ-

१ ए वस्त्राणांद्विजा